# Contribution of WOMEN to Sanskrit, Pali and Prakrit Literature

*Prof. Hansaben Hindocha Felicitation Volume*



या देवी सर्वभूतेषु विद्यारूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥


Chief Editors
**Dr. Gautam Patel, Dr. Manibhai I. Prajapati**

Editor
**Manibhai K. Prajapati**



**Professor Hansaben Hindocha Abhivadan Samiti**
Gandhinagar 2016



Scanned by CamScanner

Publisher :
Manibhai K. Prajapati
Co-ordinator
Professor Hansaben Hindocha Abhivadan Samiti
A/8, Kadi Sarva Vishwavidyalaya Staff Quarters
L. D. R. P. Engineering College Campus,
Sector-15, Gandhinagar-382015, Gujarat, India

First Edition : 2016

Price : ₹ 1250

Pages : XVI + 592

ISBN : 978-81-87471-95-0

**Distributors**

**Standard Publishers (India)**
205, Kiran Mension,
4834/34, Main Ansari Road
Daryaganj, New Delhi-110002
Tel. 011-23272334; M. 09871009093
standardpublishersindia@gmail.com

**Homi Books**
8, Bhagvati Nagar Society,
Gayatri Mandir Road, Highway,
Mehsana-384002
M. 94273 78456
email : homibooks@gmail.com

Scanned by CamScanner

# अग्निशिखायाः विदग्धता

प्रो. अर्चना दुबे

स्वकाव्यप्रतिभया आधुनिकसंस्कृतजगति विख्याता पुष्पादीक्षितमहोदया राष्ट्रपतिसम्मानेनालङ्कृताऽस्ति। १२.६.१९.४३ तमे खीस्ताब्दे जबलपुरनगरे संस्कृतस्य प्रकाण्डविदुषः पं. सुन्दरलालशुक्लमहोदयानां गृहे जन्म जातम्। १९८४ तमे वर्षे एतासाम् 'अग्निशिखा' गीतिकाव्यम् प्रकाशितम्। सर्वासु गीतिसु विरहेण सह रहस्यवाद धाराया रमणीयः संयोगश्चात्र दरीदृश्यते। प्रकृतिसिद्धमिदं मृदुत्वं नारीहृदयस्य पुरुषेभ्योऽधिकमिति धनत्वमनुभूतीनां, तीव्रत्वं संवेदनानामुद्वेगो भावानामात्मना समर्पणं हृदयस्यानिरूद्धवेगश्च स्नेहस्य जनयन्ति संभावनां काव्यबीजस्य नारीमनःस्वेव चिरमतनु च प्रसरणाय पल्लवनाय च। भावप्राचुर्यमेव हेतुरत्रातिस्पृहणीयाग्निशिखायाः प्रज्वलने। या विलक्षणा ज्वलितमपि भावनिकरं जीवयति।

इयमग्निशिखा ज्वलिता सहसैव कथं हृदये।
ज्वालैरतिजवनयुतैर्ज्वलितं ननु जीवयते॥

काव्येऽस्मिन् उपालम्भः उत्कण्ठा, प्रेम्णश्चानन्तता भावगाम्भीर्येण सह प्रस्फूटीभूतं दृश्यते। भावावेगपरिपूर्णा शब्दावली, छन्दोबन्धोऽपि प्रशस्यः यस्मिन् ग्रथितैः प्रकृतिपेशलैर्भर्विर्भावदीप्तिर्दीप्यतेरनुभूयते च वारम्वारम्।

अप्रस्तुतविधानस्य कल्पनया गीतिकाव्यमेतदतीव रमणीयमस्ति। पदलालित्यमपि लालनीयोऽतः काव्येऽस्मिन् रसानां परिपक्वता, भावनां भव्यता, अलङ्काराणां सन्निवेशचारुताऽस्ति। वि. वेंकटाचलंमहाभागाः पुष्पादीक्षित-विषये अक्षरशः सत्यमेवोक्तवन्तः यत् -

कामं निसर्गतः क्लीबं पुष्पं नारीयतु क्वचित्।
नारीभूय च सा पुष्पा सृजत्वग्निशिखामपि॥
सैषा विदग्धचित्तेषु जायते पुनरद्भुता।
लोलकल्लोलभावार्द्रपुष्पासारपयः स्विनी॥

अतः आधुनिकसंस्कृतसाहित्ये 'अग्निशिखा' नूनं कामपि नूतनां विच्छित्तिं धते।

दीक्षितमहोदयया व्याकरणस्य दर्शनशास्त्रस्य च निगूढाध्ययनं कृतम्। 'अष्टाध्यायी-सहजबोध' इति नाम्ना व्याकरणस्य सहजबोधायाष्टखण्डेषु ग्रन्थः प्रकाशितः सञ्जातः।

अग्निशिखायाः आरम्भे पिता सुन्दरलालशुक्लमहोदयस्य वन्दनमकरोत् -

येनाऽहं सुरभारतीसुरसरित्स्रोतःसु संप्लाविता
गीर्वाणीरसमाक्षरत्सुरतरोश्छायासु संवर्धिता।
यस्योत्सङ्गसुखं निषेव्य जनिरप्युत्कर्षमासादिता
श्रीमत्सुन्दरलालशुक्लमनधं तातं सदाऽहं नता॥
वात्सल्यस्य परं पदं विपदमुच्छेत्तुं सदा मे रता
तापं जर्जरितं करोति मनसो मूर्तिश्च यस्याः स्मृता।

Scanned by CamScanner

लोकेऽस्मिँल्लघु लभ्यमप्यभयदं स्थानं यदीयाञ्चलं
बन्देऽहं मनसा सदा नतिभृता तां मातरं जानकीम् ॥[1]

कवयित्री स्वकीयं बाल्यावस्थायाः गुरुः कृष्णकान्तं प्रति वन्दनां कृतवती।

येनोदभ्रान्तदिगन्तरालयशसाऽयत्तीकृताभूरियं
तेजोभिः किल मादृशाञ्च जडता जातं विदूरीकृतम्।
औदार्यामृतधारयाऽवनमितं चेतः सदा येन मे
सच्छास्त्रैश्च गुरुं भजे गुरुममुं श्रीकृष्णकान्ताभिधम् ॥[2]

पुष्पादीक्षितस्य व्यक्तित्व-कर्तृत्वे च श्रीसम्पटूरुरंगनाथमहाभागाः उक्तवन्तः -

कन्यकानांसुविख्याते महाविद्यालये पुरा।
प्राचार्यया विप्रलम्भकाव्यमग्निशिखाभिधम् ॥
प्रणीतं चाशुकविता निर्माणेऽसौ विशारदा।
पाणिनीये महाशास्त्रे लब्धाचार्यपदाप्यसौ ॥[3]

'अग्निशिखा नाम कवयित्र्या विरहविदीर्णहृदयस्य सहजमुच्छ्वसितं यत्रातिमात्रं सरलैर्मितैश्च वचोभिर्विनिवेदिता व्यष्टिगता वेदना समष्टिगतेवानुभूतिपथमवतरति। ऐकान्तिक्या अनुभूतेरेतादृशं वाङ्मयं विलसितं प्रायेणाद्यत्वे दुर्लभम्। गीतकाव्येऽस्मिन् भावमयस्य जगतो यत् सूक्ष्ममुद्घाटनं तत् श्रीजयदेवस्य गीतगोविन्दपरम्परायां कृतिमिमां स्थापयितुमर्हति।'[4]

सत्स्वपि बहुषु विप्रलम्भपरेषु मुक्तकसंग्रहेषु खण्डकाव्येषु च विरहोपालम्भ - गीतिगुच्छोऽयमपूर्व एव। प्रणयशरविद्धतरलहृदयेन छिन्नाशातन्तुबन्धतया यदुन्मुक्तमुच्छ्वसितं तदेव वज्रहृदयदलन-क्षमकाव्यवस्तुरूपेण परिणतम्। प्रत्यगाङ्कुरितकिसलयसोदरीणां मुग्धा-नुरागसहजकोमलभावभूषितानां गीतीनाममियं मञ्जरी स्वाभाविकोन्मेषेणानाघ्रातकुसुमचयेव रजनीगन्धालोकोत्तरसौरभेण कस्य न मनस्यामोदमावहति।[5]

अग्निशिखायां ४८ गीतानां संग्रहोऽस्ति। यथा - अवतरणम्, अग्निशिखा, तवनामाक्षराणि, वीतदये हृदये, नगेशशृङ्ग एषःपतितः कथम् ? सैव वीथी, विप्रलम्भ एव शिष्यते, कीदृश परिवर्तनम्मे, लब्धं न रत्नमेकम्, व्यर्थं वयो भवता विना, दर्शनं स्वप्नेऽपि नो, रोचते नैव किञ्चित्, व्यथितं मनो न निर्वायते, अयमेव मेऽपराधः, कोणमेकं देहि मे, इयती करुणा न त्वया कृता, हृदि काङ्क्षया विगतं वयः, मृत्युरेव मृतः, पारसरत्नमिदम्, कथमिव न क्षीयते क्षपा, अत एव न मे क्षीयते क्षपा, स्नेहबन्धनं विना, दयसे न किम्, मम जीवनलतिके, द्विरेफता विहीयतां सखे, तव दर्शनैषणा, नो लभ्यसे मया चेत्, प्रीतिरीतिरीदृशी, हृदयेन मे तरलायितम्, कथयस्व मे मनस्त्वम्, चेता भाविनी जन्मनि, सुखं क्वाद्य गतम्, निर्बन्धो मे मनसि, हृदयस्य गृहं ज्वलितम्, अनवसानम्।

शलभेन कृतः प्राणोत्सर्गो यथा न ज्ञायते प्रदीपेन तथैव मया त्वदर्थमग्निसात् क्रियमाणाः प्राणास्त्वया नावगम्यन्ते।

प्रीतिरीतिरीदृशी न केनचिच्छ्रुता
शलभेन, यादृशीह संप्रदर्शिता।
नावगम्यते प्रदीपकेन सा व्यथा
एकपक्षतोऽसवो यदग्निसात्कृताः ॥[6]

पारसरत्नन्तु निजसङ्गेनैव लौहं सुवर्णं विदधाति। परं मदीयं हृदयन्तु तव दर्शनैनैव सुवर्णं संजातमिति विशिष्यसेत्वं पारसरत्नादपि।



Scanned by CamScanner

विलक्षणरत्नमिदं कलितम्।
यदवेक्षणमात्रमितं मम लौह-
निभं हृदयं तपनीयमिदम्॥[७]
कामये तव हृदि निवासं
हस्यते सकलैर्जनैः।
अयि ! विशालतमेऽपि हृदये
कोणमेकं देहि मे॥
प्रीणये हृदयं त्वदीयं केन विधिना ब्रूहि मे॥[८]
अयि ! ते विशालहृदये पूरोऽस्ति रागसिन्धोः।
कृपणोऽसि बिन्दुरपि नो दत्तोऽति निर्दयेन॥[९]
मधुराकृतिस्त्वदीया कलिता यदा गुणेन
जाता विचित्रतेयं दाहस्तु चन्दनेन॥

त्वमसि शीतलचन्दनवत्। परम्मे मनोदाहस्तु त्वज्जनित एव इति विचित्रताऽस्ति।

मम निश्चलशुभ्रजले हृदये
नवरुपमिदं प्रतिबिम्बयुतं
मलिने मुकुरे भवतो हृदये
मम रुपमिदन्नहि सङ्क्रमितम्॥[१०]
जानाति योऽवमन्तुं भावोदयं विहन्तुं
अयि ! मे हते दुराशे ! संश्लेषमेषि केन?[११]
लोके किल वह्निशिखा
ज्वलयति निखिलं निकरम्।
अनया शिखया किमहो !
विपरीतमिदङ्क्रियते॥[१२]

लोकेऽग्निशिखया निखिलं वस्तुजातं दह्यते। परं मे मनसि जनितयाऽनयाग्निशिखया पूर्वं सायासं दाहिताः सर्वे भावाः पुनर्जीविता इत्यस्ति वैलक्षण्यमस्या वह्निशिखायाः।

इयमग्निशिखा ज्वलिता सहसैव कथं हृदये।
निशितैस्तव दृष्टिशरैः सकलं शकलीक्रियते॥
संदम्य मनोभावं गलिताधिरहं जाता।
ज्वालैरजितजवनयुतैर्ज्वलितं ननु जीवयते॥[१३]
मम शान्तमिदं निभृतं सुखितं
हृदयस्य गृहं ज्वलितं ज्वलितम्।[१४]
खिद्यमानमानसोऽतिक्तनिम्बसेवया
स्नेहधारया मयाऽभिषेचितोऽपि गर्हते॥
स्थायिभावयूथमप्युपद्रुतं द्रुतं कथं
यस्य शोचनेन विप्रलम्भ एव शिष्यते॥[१५]

Scanned by CamScanner

अत्र व्यङ्ग्यार्थोऽस्ति यत् नवसु स्थायिभावेष्वष्टी भावाः सर्वथा द्रुतं शीघ्रमुपद्रुताः पलायिता। रतेरप्यर्धः संयोगादिकारकः पलायितः। तव शोचनेनेदानीं मनसि मे विप्रलम्भकारकोऽर्ध एव स्थायिभावोऽवशिष्टोऽस्ति।

ग्रन्थान्ते नायिकायाः अनन्त-पीडा निम्नलिखिते पद्येऽभिव्यक्ता जाता -

गता नो गन्ता वा शममपि च पीडाऽनवसिता
न याता नो याता क्षणमपि विरामं मम कथा।
न रेमे रन्ता वा विकलितमिदम्मे हतमनो
मनोज्ञोऽसि त्वं रे ! न च मम मनोऽज्ञायत कथम् ?
संयोगादितया तनोत्यतनु यद्योगे भृशं लोभनम्।
नान्तं रूपमुपेत्य नान्तमपि यत्तन्तन्यते तोदनम्॥
तत् प्रेम प्रचुरायते मनसि नो मेमीयते मानसम्।
धिक्तद् धिङ्मदनं भवन्तमपि धिग् धिङ्मानसं रे रतम्॥

'प्रेमन्' शब्दं दुःखस्य कारणं मत्वा कवयित्री कथयति यत् - ''प्रेमन् शब्दस्य रचना संयोगादिर्नकारान्ता च विद्यते संयोगादित्वेनैव परसंयोगविषयको लोभो जन्यते तेन। नान्तत्वेन च तज्जनितं तोदनं (पीडनं) नान्तं भवति। नान्तत्वञ्च न विद्यतेऽन्तो यस्य तथाभूतमनन्तमित्यर्थः। अनन्तपीडाहेतुत्वञ्च प्रेम्णोऽवगम्यते। तथाभूतमनन्तं प्रेम मे मानसे प्रचुरायते, परं मे मानसस्य धारित्वं नो मिमीते।

अत्र भतृहरेः 'धिक्तां च तं च मदनं च इमां च मां च' इत्यस्य स्पष्टः प्रभावः परिलक्षितोऽस्ति -

यां चिन्तयामि सततं मयि सा न रक्ता
सा चान्यमिच्छति जनं स जनोऽन्यासक्तः।
अस्मत्कृतेऽपि परितुष्यति कचिदन्या
धिक्तां च तं च मदनं च इमां च मां च॥१७

जने प्रेमप्लुते ताटस्थ्यमाबध्नाति लोकोऽयम्।
तटस्थे प्रीतिमाधातुं सयन्तो भातिलोकोऽयम्।
असह्यं वेदनं सूते स्वदेहे कण्टकस्याग्रम्।
शरीरं मे शराकीर्ण क्रमित्वा याति लोकोऽयम्॥[१८]

अग्निशिखायां प्राचीनाधुनिकछन्दसां प्रयोगो कृतवती। प्राचीनेषु वंशस्थ, इन्द्रवज्रा, शार्दूलविक्रीडितम्, शिखरिणी, हरिणी, मन्दाक्रान्तादयः।[१९]

मन्दाक्रान्तायाः प्रयोगविषये क्षेमेन्द्रोक्तवान् -

प्रावृट्प्रवास-व्यसने मन्दाक्रान्ता विराजते॥[२०]

अनया दृष्ट्या पुष्पादीक्षितद्वारा रचितेन 'निर्बन्धो मे मनसि' शीर्षककवितायाम् अस्य छन्दः प्रयोगो विषयानुबन्धी विद्यते। यथा -

निर्बन्धो मे मनसि जनितस्त्वत्कृते कीदृशोऽयं
प्राप्त्याशा नो विरमति कथं नेप्सिता यत् त्वयाऽहम्।
प्रेम्णो बन्धादपि गुरुतरो विद्यते किन्नु लोके
लोकाक्रोशं गुरुतरमहो मन्यसे यत्सदा त्वम्॥



Scanned by CamScanner

स्मारं स्मारं मृदुलवदनं चन्द्रनीकाशमेतद्
वाष्पाम्बु प्रक्षरति नयनं मे द्रुतं चन्द्रकान्तम्॥[२१]

मन्दाक्रान्तायाः सुन्दरतायाः विषयेऽपि क्षेमेन्द्रः कथितवान् यत -

मन्थराक्रान्तविश्लैश्चतुर्भि प्रथमाक्षरैः।
मध्यषट्केऽतिचतुरे मन्दाक्रान्ता विराजते॥[२२]

स्रग्विणी[२३], तोटक[२४] छन्दसां प्रयोगोऽपि बहुलतायाऽभवत्। तोटके सगण-वर्णस्यचमत्कारं चमत्कृतं करोति।[२५]

अयि ! पारसरत्नमिदं निखिले
भुवने किल किं बहुशः प्रथितम्।
विदधाति न यल्लघुलौहकणं
निजसङ्गमनेन विना कनकम्॥
द्रुततालयैरेव, व्यक्तं रुक्षाक्षरैः पदैः।
प्रनर्तयति यच्चित्तं, तत्तोटकमभीप्सितम्॥[२६]
तमसि प्रविलीनविबोधविहीनमये ! परिपीनमिदं निबिडम्।
मम पीडनवेदनबाधनकष्टकुलं क्वचिदेव न जागरितम्॥[२७]

पञ्चादशवर्णानां तूर्णक[२८] छन्दसां अधिकताऽस्ति। आधुनिकवृत्तेषु कजरी[२९] गीति[३०] आधुनिक विषमवृत्ताना[३१] प्रयोगोऽस्ति कवितायां दृष्टिगतः जातः।

ध्रुवकस्य प्रायोगोऽपि निम्नाङ्कितासु सन्ति। अग्निशिखा, तव नामाक्षराणि, सैव वीथी, मम वामनवृत्तिरियम्, विप्रलम्भ एव शिष्यते, कीदृशं परिवर्तनम् अहमेव किन्न निदर्शनम्, लब्धं न रत्नमेकम्, व्यर्थं वयो भवता विना इत्यादयः।

ज्ञायते नैव मदीयन्तु सुखं क्वाद्य गतम्।
रुचिरा सैव धरा सैव मतिः सैवाऽहम्॥
ज्ञायते नैव मदीयन्तु सुखं क्वाद्य गतम्।

रमते येषु जनस्तेषु सुखं नैव लभे।
अयि ! विभवेषु मनो मेऽस्ति कदा संसक्तम्।
ज्ञायते नैव मदीयन्तु सुखं क्वाद्यं गतम्।

मनसो गहनतले भावजलधिरुन्मथितो।
मज्जनं तत्र विदग्धेन न केनापि कृतम्॥
ज्ञायते नैव मदीयन्तु सुखं क्वाद्य गतम्।

जलधे रत्नकुलं तीव्रमरुद्व्यालुलितम्।
तन्तुना स्नेहयुतेनापि न तत्संग्रथितम्॥
ज्ञायते नैव मदीयन्तु सुखं क्वाद्य गतम्।

कल्पितं सपदि मया रागमयं नवनीडम्।
रचनात्प्रागपि तद् वह्निशिखाभिर्ज्वलितम्॥
ज्ञायते नैव मदीयन्तु सुखं क्वाद्य गतम्।



Scanned by CamScanner

जलधिं रोदधुमये ! कोऽस्ति समर्थो भुवने।
प्रिय ! ते प्रीतिरसी पूरमिमं रोद्धुमलम् ॥
ज्ञायते नैव मदीयन्तु सुखं क्वाद्य गतम्।[३२]

अस्य काव्यस्य सम्बन्धे डॉ. प्रभुदयालु अग्निहोत्री महोदयेनोक्तम् - सत्स्वपि बहुषु विप्रलम्भपरेषु मुक्तकसंग्रहेषु खण्डकाव्येषु च विरहोपालम्भगीतिगुच्छोऽयमपूर्व एव। प्रणयशरविद्ध - तरलहृदयेन छिन्नाशातन्तुबन्धतया यदुन्मुक्तमुच्छ्वसितं तदेव वज्रहृदयदलनक्षमकाव्यवस्तुरुपेण परिणतम्। प्रत्यगाङ्कुरितकिसलयसोदरीणां मुग्धानुरागसहजकोमलभावभूषितानां गीतीनामियं मञ्जरी स्वाभाविकोन्मेषेणानाघ्रातकुसुमचयेव रजनीगन्धालोकोत्तरसौरभेण कस्य न मनस्यामोदमावहति।[३३]

अतः अग्निशिखायां भावानां भव्यता, भाषाया भावानुरूपता, गुणानां वृत्यनुसारिता, वृत्तीनाञ्च गुणानुवृत्तितेति सकलाः सत्काव्यानुगुणा सगुणसामग्री सहृदयहृदयाह्लादन-क्षमां महतीं क्षमतामाधत्ते। एषा अग्निशिखा वैणिक (Lyric) काव्यमधुधाराम् अर्वाचीनां समीचीनां पुष्णाति। स्वतः समुच्छलितानां भावानामहमहमिकया काव्येऽस्मिन् प्रस्तुतिः जाताः प्रियसङ्गविषयिकां भावनामाधारीकृत्य नैसर्गिकः स्नेहबन्धोऽत्र भावप्रवणतया चित्रितः।

मनोहरं काव्यमिदं निपाठं निपाठमायाति मनो न तृप्तिम्।
भूयो रसास्वादनतत्परं सद् बध्नाति भूयोऽपि च तत्र भावम्॥
माध्वीकमाधुर्यधरा मनोज्ञा विराजमाना गुणराजिभिश्च।
वागत्र सत्यं प्रसभं मनांसि हरेत्समेषामिति मे प्रतीतिः॥
रसैः सुपुष्टं समलङ्कृतञ्च निर्दोषलेशं सुतराञ्च हारि।
काव्यं भवत्या दृढसन्धिबन्धं नेत्रद्वयासेचनकं विभाति॥[३४]

## सन्दर्भसूचि


१. अग्निशिखा, वन्दनम्,
२. अग्निशाखा,
३. अर्वाचीनसंस्कृतम् (संस्कृत-पत्रिका), पृ. सं. २१
४. अग्निशिखा - विदुषामाशिष : - डॉ. जगन्नाथपाठकः
५. अग्निशिखा - विदुषामाशिष : - डॉ. जगन्नाथपाठव
६. प्रीतिरीतिरीदृशी, अग्निशिखा - पृ. सं. - ७८.
७. पारसरत्नमिदम्, अग्निशिखा - पृ. सं. ५६.
८. कोणमेकं देहि मे, अग्निशिखा - पृ. सं. - ४३.
९. जाताविचित्रतेयम्, अग्निशिखा - पृ. सं. ३०.
१०. तववीतदये हृदये, अग्निशिखा - पृ. सं. - ९
११. जाता विचित्रतेयम्, अग्निशिखा - पृ. सं. ३०-३१.
१२. अग्निशिखा, पृ. सं. ४.
१३. अग्निशिखा, ३-४
१४. हृदयस्य गृहं ज्वलितम्, अग्निशिखा, पृ. सं. - ९२.
१५. विप्रलम्भ एव शिष्यते - १७
१६. अवतरणम्, पृ. सं. २.
१७. वैराग्यशतकम्, भर्तुहरि श्लोक सं.-१०६, पृ. सं. १४०.




Scanned by CamScanner

१८. 'दूर्वा' संस्कृत-पत्रिका, मई १९९०.

१९. मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरु चेत्। वृत्तरत्नाकरः, ३/९७.

२०. सुवृत्ततिकलम्, ३/२१

२१. निर्बन्धो मे मनसि, पृ. सं. ९०.

२२. सुवृत्ततिलकम्, २/३४.

२३. वीथिका सा वृथा त्वं न लब्धो यया सैव वीथी यया त्वमसौ गम्यते। - सैव वीथी, अग्निशिखा - पृ. सं. १३.

२४. पारसरत्नमिदम्, अग्निशिखा - पृ. सं. ५६.

२५. इह तोटकमम्बुधिसैः प्रथितम्।। वृत्तरत्नाक, ३/४८.

२६. वही, ३/७९

२७. अग्निशिखा, ९२.

२८. उन्नतो नगेशशृङ्ग एष पतितः कथम्। - अग्निशिखा, पृ. सं. १२.

२९. अयि मिलिन्द ! एहि मधुरसो निपीयतां द्विरेफता विहायतां सखे ! - अग्निशिखा, पृ. सं. ६०.

३०. मिलतीति कोऽपि भवत्समो हृदि काङ्क्षया विगतं वयः। या कामना मनसा कृता विगतं तथैव हतं वयः ॥ - अग्निशिखा, पृ. सं. ४८.

३१. (क) विशकलिता विकचवनीयम्, - अग्निशिखा, पृ. सं. ६६.
(ख) दर्शनं स्वप्नेऽपि नो, - अग्निशिखा, पृ. सं. २६.

३२. सुखं क्वाऽद्य गतम्, अग्निशिखा, पृ. सं. ८७.

३३. अग्निशिखा - विदुषामाशिषः भूमिका भाग में, डॉ. प्रभुदयालु अग्निहोत्री

३४. अग्निशिखा - विदुषामशिषः डॉ. सत्यव्रत शास्त्री

[डॉ. अर्चना दुबे, श्री सोमनाथ संस्कृत विश्वविद्यालय, राजेन्द्र भुवन रोड, वेरावल,
जिलाः गिर सोमनाथ, गुजरात ३६२२६५ मोबाइल नं. ०९५५८८७९२१]

पूजनीया महाभागाः पुण्याश्च गृहदीप्तयः ।
स्त्रियः श्रियो गृहस्योक्तास्तस्माद् रक्ष्या विशेषतः ।

स्त्रियाँ घर की लक्ष्मी कही गई हैं। ये अत्यन्त सौभाग्यशालिनी,
आदर के योग्य, पवित्र तथा घर की शोभा है,
अतः उनकी विशेष रूप से रक्षा करनी चाहिए।

- वेदव्यास (महाभारत, उद्योगपर्व, ३८।११)